सि॰कौ॰ "दूराद्धूते च" पा॰। "दूरात् सम्बोधने यद्वाक्यन्तस्य टेः प्लुतः स्यात्। सक्तून् पिब देवदत्त३!" "हैहेप्रयोगे हैहयोः" पा॰। एतयोः प्रयोगे दूराद्धूते यद्वाक्यन्तत्र हैहयोरेव प्लुतः स्यात्। है३ राम! राम! है३ "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्" पा॰ दूराद्धूते यद्वाक्यन्तस्य ऋद्भिन्नस्यानन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। दे३वदत्त। देवद३त्त। देवदत्त३। गुरोः किम्। वकारात् परस्य अकारस्य मा भूत्। अनृतः किम्। कृष्ण३। एकैकग्रहणं पर्यायार्थम्। इह प्राचामिति योगो विभज्यते तेन सर्वः प्लुतो विकल्प्यते "अप्लुतवदुपस्थिते" पा॰। उपस्थितोऽनार्ष इतिशब्दस्तस्मिन् परे प्लुतोऽप्लुतवद्भवति। अप्लुतकार्यं यणादिकङ्करोति। सुश्लोक३ इति। सुश्लोकेति। वत् किम् अप्लुत इत्युक्ते प्लुत एव निषिध्येत तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणन्न स्यात्। अग्नी३ इति। "ई३ चाक्रवर्मणस्य" पा॰ ई३ प्लुतोऽचि परेऽप्लुतवद्वा स्यात्। चिनुहीति चिनुहि३ इति। चिनुहि३ इदं चिनुहीदम्। उभयत्र विभाषेयम् "ओमभ्यादाने" पा॰ ओंशब्दस्य प्लुतः स्यात् आरम्भे। ओ३म् अग्निमीडे पुरोहितम्। अभ्यादाने किम् ओमित्येकाक्षरम "ये यज्ञकर्मणि" पा॰ ये३ यजामहे। यज्ञेति किम् ये यजामहे३ "प्रणवष्टेः" पा॰ यज्ञकर्मणि टेरोमित्यादेशः स्यात्। अपां रेतांसि जिन्वतो३म्। टेः किम् हलन्ते अन्त्यस्य मा भूत्। "याज्यान्तः" पा॰ ये याज्यान्ता मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि। जिह्वामग्ने! चकृषे हव्यवाह३। अन्तः किम्। याज्यानामृचां वाक्यसमुदायरूपाणां प्रतिवाक्यं टेर्न स्यात्। सर्वान्तस्य चेष्यते "ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः" पा॰ एषामादेः प्लुतो यज्ञकर्मणि। अग्नयेऽनुब्रू३हि। अग्नये गोमयानि प्रे३ष्य। अस्तु श्रौ३षट्। सोमस्याग्ने ब्रूहि वौ३षट्। अग्निमा३वह "अग्नीत् प्रेषणे परस्य च" पा॰ अग्नीधः प्रेषणे आदेः प्लुतस्तस्मात् परस्य च। ओ३ श्रा३वह नेह अग्नीदग्नीन् विहर३। बर्हिस्तृणीहि३। "विभाषा पृष्टप्रतिवचने हेः" पा॰ प्लुतः। अकार्षीः कटम् अकार्षं हि३। अकार्षं हि। पृष्टेति किम् कटं करिष्यति हि३। हेः किम् करोमि ननु "निगृह्यानुयोगे च" पा॰ अत्र यद्वाक्यन्तस्य टेः प्लुतो वा। अद्यामावास्येत्यात्थ३। अद्य अमावास्येत्येवंवादिनं युक्त्या स्वमतात् प्रच्याव्य एवमनुयुज्यते। "आम्रेडितम्भर्त्सने" पा॰ दस्यो दस्यो३ घातयिष्यामि त्वाम्। आम्रेडितग्रहणं द्विरुक्तोपलक्षणम्। चौर३ चौर। "अङ्गयुक्तन्तिङाकाङ्क्षम्" पा॰ अङ्गेत्यनेन युक्तन्तिङन्तं प्लवते। अङ्ग कूज३ इदानीं ज्ञास्यसि जाल्म!। तिङ् किम्? अङ्ग देवदत्त! मिथ्या वदसि३। आकाङ्क्षं किम् अङ्ग पच। नैतदपरमाकाङ्क्षति। भर्त्सन इत्येव। अङ्गाधीष्व भक्तन्तव दास्यामि। "विचार्यमाणानाम्" पा॰ वाक्यानां टेः प्लुतः। होतव्यं दीक्षितस्य गृह३ इ। (वक्ष्यमाणेन एतः स्थाने इः) न होतव्य३मिति। होतव्यन्न होतव्यमिति विचार्यते। प्रमाणैर्वस्तुतत्त्वपरीक्षणं विचारः। "पूर्वन्तु भाषायाम्" पा॰ विचार्यमाणानां पूर्वमेव प्लवते। अहिर्नु३ रज्जुर्नु। प्रयोगापेक्षत्वं पूर्वत्वम्। इह भाषाग्रहणात् पूर्वयोगश्छन्दसीति ज्ञायते। "प्रतिश्रवणे च" पा॰ वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च। गां मे देहि भो हन्त३ ते ददामि३। नित्यः शब्दो भवितुमर्हति३। देवदत्त! किमात्थ३। "अनुदात्तं प्रश्नान्ताभिपूजितयोः" पा॰ अनुदात्तः प्लुतः स्यात्। दूराद्धूतादिषु सिद्धस्य प्लुतस्यानुदात्तत्वमात्रमनेन विधीयते। अग्निभूत३ इ। पट३ उ। अग्निभूते पटो एतयोः प्रश्नान्ते टेरनुदात्तः प्लुतः। शोभनः खल्वसि३ माणवक३। "चिदिति चोपमार्थे प्रयुज्यमाने" पा॰ वाक्यस्य टेरनुदात्तः प्लुतः। अग्निचिद्भाया३त्। अग्निचिदिव भायात् उपमार्थे किम् कथञ्चिदाहुः। प्रयुज्यमाने किम् अग्निर्माणवको भायात् "उपरि स्विदासीदिति च" पा॰ टेः प्लुतोऽनुदात्तः स्यात्। उपरि स्विदासी३त्। अधः स्विदासी३दित्यत्र तु विचार्यमाणानामित्युदात्तः प्लुतः। "स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु" पा॰ स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये। असूयायाम् अभिरूपक३ अभिरूपक रिक्तन्त आभिरूप्यम्। सम्मतौ। अभिरूपक३ अभिरूपक शोभनोऽसि। कोपे। अविनीतक३ अविनीतक इदानीं ज्ञास्यसि जाल्म!। कुत्सने। शाक्तीक३ शाक्तीक रिक्ता ते शक्तिः। "क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्" पा॰ आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यात् आचारभेदे आशिषि प्रैषेषु गम्यमानेषु। स्वयं ह रथेन याति३ उपाध्यायं पदातिं गमयति। प्रार्थनायाम्। पुत्रांश्च लप्सीष्ट३ धनञ्च तात। व्यापारणे। कटं कुरु३ ग्रामं गच्छ। आकाङ्क्षं किम्